110112

श्रीगणेशायनमः।। विभक्तानामेवपृथक्पृथक्श्राद्धाधिकारात्श्राद्धस्तवकानंतरंदायविभागोनिरूप्यते तत्रना
रदः विभागोर्थस्यपैत्रस्यपुत्रैर्यत्रप्रकल्प्यते।। दायभागइतिप्रोक्तंतद्विवादपदंबुधैः पैत्रस्येतिपितामहादेरप्यसुपल
क्षणंतद्दितिविशेषणं चत्वारःकालाविभागस्यजीवत्येवपितरिपितुर्यदाविभागेच्छासतावदेकःकालःनिवृत्तरजस्कायां
मातरिस्त्रीस्वभावनभिलाषिणिइत्यनिस्पृहेचपितरिपुत्रैर्निछायामपियदापुत्रेणेच्छासोन्यः रजस्कायामपिमातरिअनि
च्छत्यपिपितरितस्मिन्मृते अधर्मभीरौनिअविद्किष्यरोगग्रस्तेवासतियदिपुत्रेच्छासोन्यतरःपित्रमरणानंतरमपरइ
ति तत्रप्रथमपक्षमाहयाज्ञवल्क्यःविभागंचेत्पिताकुर्यादिच्छयाविभजेसुतान् ज्येष्ठंवाश्रेष्ठभागेनसर्वेवायुःसमोहि
नः श्रेष्ठादिभागश्चमनुनाऽभिहितः ज्येष्ठस्यविंशतिद्वारःसर्वद्रव्यत्रयद्वरं ततोर्धंमध्यमस्यास्यात्तुरीयंतुयवीयसः
अस्यार्थः विभज्यद्रव्येविंशतितमोभागःयश्चविभाज्यद्रव्येश्रेष्ठंतुज्येष्ठायदातव्यं तथाचत्वारिंशत्तमोभागोमध्यम
द्रव्यंचमध्यमायअशीतितमोभागोहीनद्रव्यंकनिष्ठायदातव्यं ततोवशिष्टद्रव्यंसमंविभज्यग्रहीयादिति एवमन्यान्यपि

3
1950

विषमभागप्रतिपादकानिगौतमवचनानि बहूनिसंतिनानि ग्रथविस्तरभयान्नेहप्रदर्शितानिसिद्धत्वेपिलोकविरुद्धत्वादस्व
र्ग्यलोकंविद्विष्टंधर्ममथाचरेन्नतिति वचनाच्चायंविभागक्रमोनानुष्ठेयः स्मर्यते यद्यथानियोगेधर्मोन्योनान्यबंधावधो
पिवा तथोध्वरेविभागोपिनैवंसंप्रतिवर्त्तते यदिदैवात्किंचिदाकरोतिविषमभागंतदाननिवर्त्तनाद्साहयाज्ञवल्क्यः न्यूनाधिक
विभक्तानांधर्म्यःपित्रृक्तःस्मृतः धर्म्यःयदिधर्मादनपेस्तर्हिननिवर्त्तनीयइत्यर्थः अधर्म्यश्चेन्निवर्त्तनाद्रक्तंभवति तथा
चनारदः अन्यथाशास्त्रकारीचविभागेपिताप्रतिरिति॥यत्रचविषमविभागेलोकविद्वेषाभावस्तत्रविषमविभागोभवत्ये
व॥यथाहनारदः॥द्वाविंशोप्रतिपद्येतविभजन्नात्मनःपितेति॥एतच्चस्वतंत्रोपार्जकपरं॥यदाहवसिष्ठः यिनचैषांस्व
यमुपार्जितंस्यात्सज्येष्ठांशमेवलभतेति॥येएषांयोदार्हेपित्रक्षात्रादीनांदौहित्रीयंपक्षमाह॥विभजेत्सूर्धनंसममित्युक्तौना
रदः॥मातुर्निजंतुरजसिप्रजातासुभगिनीषुच॥निवृत्तेचापिरमणेपितुर्यौपरतस्पृहे॥प्रजातासुविवाहितासुरमणंस्त्रीसंभो
गः॥तदिच्छानिवृत्तौसत्यामित्यर्थः॥स्पृहाद्रव्यविषया॥तृतीयपक्षमाहशंखः॥अकामेपितरिरिक्थमूर्ध्वंपरीतचेतसि

तसिरोगिणिचेति॥अकामेअनिच्छेपरीतचेतसिअधर्मवर्त्तिनि॥चतुर्थंपक्षमाहयाज्ञवल्क्यः॥विभजेरन्सहाप्युर्ध्व
रूर्ध्वंपितरिक्थमृणंसमं॥पित्रोर्मातापित्रोरूर्ध्वं॥रिक्थंतदीयद्रव्यं॥तदीयमृणंचसमंविभजेरन्नित्यर्थः॥पितृमरणानंत
रंपतित्यादिदोषयुक्तेवापितरिजीवतियदापुत्राएवविभागकर्तारस्तदाविद्वेषमाहसएव॥असंस्कृतास्तुसंस्कार्या
भ्रातृभिःपूर्वसंस्कृतैः॥भगिन्यश्चनिजादंशादत्वांशंतुतुरीयकं॥असंस्कृतानांविवाहांतसंस्कारेसंस्कृतानांभ्रातृणां
भगिनीनांचविवाहांतसंस्कारंकृत्वापश्चाद्विभागःकर्तव्यइत्यर्थः॥भगिन्यश्चेत्यादेरयंतात्पर्यार्थः भगिनीनामविवाहि
तानांविवाहंकृत्वाभ्रातृभिश्चतुर्थमंशंदद्यात्॥कस्मान्निजादंशात्॥यत्रयज्जातीयपुत्रस्ययोद्वाःचतुस्त्रिद्वैकभागाःस्युरिति
वक्ष्यमाणःसोंशोनिजांशास्तस्माद्यंविभागक्रमःब्रह्मणस्यैवरैकापलीतसुतोर्थेकएव॥तत्रपितृद्रव्यंहेयंविभज्यत
न्मध्येएकमंशंचतुर्द्धाविभज्यचतुर्थमंशंकन्यकायैदत्वाबलिष्ठंपुत्रोगृह्णीयात्॥यदापुत्रोद्वौकन्यकाचैकातदापिद्रव्यं
त्रेधाविभज्यतत्रैकमंशंचतुर्ध्वाकृत्वातुरीयांसंकन्यायैदत्वाबलिष्ठंद्वावपिपुत्रावर्थंगृह्णीतः॥एवंबहुपुत्रत्वेकन्याबहुत्वे

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

चोहनीयं॥ यद्येकः पुत्रः द्वे चकन्ये तदापित्रर्धनंत्रेधा विभज्य तत्रैकं भागं चतुर्धा कृत्वा एकमेव चतुर्थांशं द्वाभ्यां कन्याभ्यां
दत्वा वशिष्टमखिलं पुत्र एव गृह्णाति॥ एवमेव सम्भानजातीयेषु भ्रातृषु भगिनीषु संख्या वैषम्ये योजनीयं॥ यदा जाति
वैषम्यं संख्यासाम्यं वैषम्यं वा तदैवं द्रष्टव्यं॥ तथा ब्राह्मणस्य॥ ब्राह्मणादिभार्यासु तत्र ब्राह्मणीपुत्रः कन्या च तथा क्षत्रियापु
त्रः कन्या च॥ तथा वैश्यायाः शूद्रायाश्चैवमष्टावपत्यानि॥ तत्र चत्वार्यपत्यानि स्त्रियश्चत्वारः पुमांसः चतुस्त्रिद्येकभागाः सु
रिति वचनेन ब्राह्मण्यपत्ययोरष्टवंशाः क्षत्रियापत्ययोः षड्वैश्यापत्ययोश्चत्वारः शूद्रापत्ययोर्द्वौ एवं विंशतिभागान् कृत्वा
ब्राह्मणीकन्यायै स्वजातिपुत्रविहितादंशाच्चतुष्टयरूपान्निजाद्भागाच्चतुर्थमंशं दद्यात्॥ क्षत्रियाकन्यायै स्वजातिपुत्रविहितादं
शात्त्रयरूपान्निजान्भागाच्चतुर्थमंशं दद्यात्॥ शूद्रकन्यायै स्वजातिपुत्रविहितादेकांशरूपादेवनिजाद्भागाच्चतुर्थमंशं द
त्वा तत्तद्भागाच्चतुर्थांशं दत्वा तत्तद्भागादवशिष्टं द्रव्यमेकीकृत्य ब्राह्मण्यादिपुत्रः क्रमाच्चतुस्त्रिद्येकभागादिक्रमेणैकत्र
यित्वा कन्यकानां स्वस्वजातिविहिताभागाच्चतुर्थमंशं दत्वा वशिष्टं तत्तद्भागद्रव्यं सर्वे पुनश्चतुस्त्र्यादिक्रमेण विभज्य गृह्णी

7
1950

युरिति योजनीयं॥ केचनैवं मन्यंते॥ पूर्वोक्तरीत्या चतुर्थमंशं कन्यकायै दत्वानेनैव विवाहः कर्तव्यो नतु सवर्णिता[illegible]वि
वाहं कृत्वा पुनरपि चतुर्थांशदानमिति॥ तन्मेधातिथिमिताक्षरादीनामनभिमतत्वादुपेक्षणीयं अथवा [illegible]
स्यादायविभागकालस्तत्संगागतं चेत्येतदुभयं निरूपितं॥ सांप्रतं दायग्रहणव्यवस्थां दर्शयितुं मुख्यगौणपुत्रान्निरूपय
ते॥ तत्र याज्ञवल्क्यः॥ औरसो धर्मपत्नीजस्तत्समः पुत्रिकासुतः॥ क्षेत्रजः क्षेत्रजातस्तु सगोत्रेणेतरेण वा॥ गृहे म
न्नु संस्कृतोऽजस्तु सुतः स्मृतः॥ कानीनः कन्यकाजातो मातामहसुतो मतः॥ अक्षतायां क्षतायां वा जातः पौनर्भवः स्मृ
तः॥ दद्यान्माता पिता वा यां सपुत्रो दत्तकोभवेत्॥ क्रीतश्चतां विक्रीतः कृत्रिमस्त्वात्मयं कृतः॥ दत्तात्मातुः स्वयं दत्तोगर्भ
विन्नः सहोढजः॥ उत्सृष्टोग्रहणे यस्य सोपविद्धोभवेत्सुतः॥ पिंडदोंऽशहरश्चैषां पूर्वाभावे परःपरः॥ सजातीयेषु यं पुत्रं
कृत्वनयेत्पुत्र यथाविधिः॥ सवर्णाधर्मविवाहोढाधर्मपत्नीतस्यां जातः पुत्रऔरसः॥ सच मुख्यः॥ तथा आसुरादिविवाहो
ढासवर्णापुत्रोपि॥ तथा अनुलोमविवाहितक्षत्रियास्त्रीषु ब्राह्मणादुत्पन्नः मूर्धावसिक्तो वैद्यानिषादापरपर्यायः॥ पो

रत्रयश्चवैश्यादिस्त्रियोराजउत्सन्नोमाहिष्योश्रोत्र॥शूद्रायांवैश्यादुत्सन्नःकरणश्चेत्येतेऔरसाएवपुत्रिकापुत्रः
पुत्रिकायाश्चपुत्रइत्यन्यविधौपिपुत्रिकात्वतत्समःऔरससमः॥तथाचाश्वायणोपिजनकस्यौरससम
एवासमानवर्णेनसगोत्रेणेतरेणसपिंडेनदेवरेणनियोगधर्मेणोत्पन्नःक्षेत्रजः॥अनिश्चितपुरुषविज्ञानात्
सवर्णात्मर्तृगृहेप्रच्छन्नउत्पन्नोगूढजःअनिश्चितपुरुषविज्ञोपुत्रंभर्तुरेवनस्त्रियः॥सवर्णत्वज्ञानंस्त्रीद्वारात्तु
यातत्स्वरूपज्ञातत्वात्॥तत्रबलादुत्सिपुरुषांतरसंभोगात्सापिवर्णविज्ञोवेनजानातितत्रगूढजनाममात्रधारीनरयो
क्तगूढजवत्प्रत्यवसःसवर्णाकान्यकायामुत्पन्नःकानीनःसमातामहस्कन्नः॥यदिसाअविवाहितापितृगृहएवतिष्ठ
तियदिचेद्विवाहितातदासपुत्रोवोढुरेव॥तथाचमनुः॥पितृवेश्मनिकन्यातुयंपुत्रंजनयेद्रहः॥तंकानीनंवदेन्नाम्ना
ढुःकन्यासमुद्भवं॥इत्रवोढुरित्यपादानाद्विवाहिताचेत्तदावोढुर्नचेन्मातामहस्येयंतदुच्यते॥सताचेतिद्विधा॥
पुनर्भूस्तस्यासवर्णोढुरुत्पन्नःपौनर्भवःदत्तकोपिसवर्णएव॥यदाहमनुःमातापितावादद्यातांयमद्भिःपुत्रमापदि॥स

दृश्यतेसंयुक्तंदत्तेयोदत्रिमःसुतः॥सदृशंसवर्णं॥प्रत्तारिप्रोषितेमृतेवाआपदिकेवलंपितुरधिकारः॥तथामा
तरिमतायामुपात्तदत्तादिदोषयुक्तायांवाआपदिकेवलंपितुरधिकारः॥अन्यथातयोरपिसतोरापदीसापत्यंदत्तादा
दनापदिदेयमित्यर्थः॥अनापदिदत्तेदातुर्दोषेनप्रतिग्रहीतुः॥एकपुत्रोनदेयोनापिप्रतिग्राह्यइत्याहवसिष्ठः॥नचै
वैकंपुत्रंदद्यान्नप्रतिगृह्णीयादिति॥तथाज्येष्ठापिननदेयः॥पुत्रप्रतियहप्रकारमाहवसिष्ठः॥पुत्रंप्रतिगृह्णीयन्नवंवर्षंनाढ्य
राजनिविद्यानिवासस्थमध्येव्याहृतिभिर्हुतावृरबांधवंबंधुसन्निधौएवंप्रतिगृह्णीयादिति॥तत्रवासस्थंदत्तकं॥
अयंतदेत्यामाषाविप्रकृष्टस्यप्रतिषेधार्थंमदूरबांधवमित्युक्तं॥अथैनंविधिः॥क्रीतःस्वयंदत्तश्चिमोवापियथायोग्यः
एकःपुत्रज्येष्ठअतिरेकेणआपदिमातापित्रोर्वोक्तरीत्याप्रसवंयोवाक्रीतःसवर्णः॥क्रीतपुत्रः॥यत्तुमनुनोक्तं॥सक्री
तस्तुकृतस्तस्यसदृशेसदृशोथवा॥इति॥तद्गुणैःकृतासदृशोवेयेनसह॥मनुब्राह्मणत्वात्॥इतरवर्णमातापित्रोरहि
तःसवर्णोदनादिकृतदत्तेनेनप्रतिलोमितःसन्पुत्रार्थिनापुत्रीकृतायःसदृत्रिमः॥मातापित्रोर्विहीनःतत्परिग्रहोवाअहं

तव पुत्रोभवामिति प्राप्तः स्वयंदत्तः अत्रापि सवर्णत्वेव॥ सगर्भायांविवाहितायांतस्माद्गर्भाद्यउत्पन्नःसमहोढः॥यदि चेत्सगर्भःसवर्णजःमातापित्रोनुसृष्टःपरित्यक्तःसवर्णोयोग्यतेपुत्रत्वेनसोपविद्धः॥अत्रक्रमंदर्शयतिपिंडदो हरश्चेत्येतेसवर्णाएवपुत्राभवंतीत्याहसजातीयेष्वयमिति॥एतेक्षेत्रजादयोयद्यधिकवर्णादुत्पन्नास्तदापितन्ना मधेयभाजोभवंत्येव॥अपितुसवर्णादुत्पन्नाइवप्रशस्ततराणिभवंतिसजातीयेष्वयंक्रमइतिसजातीयनियमात्॥यदि हीनवर्णादुत्पन्नास्तदापिप्रतिलोमत्वेननिंद्याएवेतिविवेचनीयं॥कानीनसहोढपौनर्भवानांसवर्णत्वंजनकद्वा रेणनस्वरूपतः॥तेषांकुंडगोलकत्वेनस्वतोवर्णजात्यंतर्भावात्॥पुत्रिकारणानंतरंमौरसपुत्रोक्तौविशेषमाहमनुः॥पुत्रि कायांकृतायांतुयदिपुत्रोनुजायते॥समस्तत्रविभागःस्यादेष्टानास्तिहिस्त्रियः॥कात्यायनः॥उत्पन्नेचौरसेपुत्रे च सुर्योन्यहराःस्मृता॥ऽसवर्णाःसवर्णाअसवर्णास्तुग्रासाच्छादनभाजनाः॥सवर्णाःक्षेत्रजदत्तकक्रीतकृत्रिमस्वयंदत्तापविद्धाःअ सवर्णाःकानीनसहोढपौनर्भवाःमनुविष्णुवचनं॥अप्रशस्तास्तुकानीनसहोढजाः॥पौनर्भवेनैव

सेपिंडरिक्थांशहरतिनदौरसेसतिचतुर्थोन्यनिषेधपरं॥औरसाद्यभावेतुकानीनादीनामपिसवर्णत्वेनपुत्र धनग्रहणमस्त्येवाभावेपरःपरःसृतिवचनादितिविज्ञानेश्वरमतं॥यथान्यायमेवक्रमस्तथास्मार्तेषुदर्शितं विज्ञानेश्वरटीकायांस्वबोधायदायविभागप्रकरणेयस्तंत्राधिकारीसन्नपिलोभाद्यभावात्स्वयंजनयितुंशक्तोवा द्वानजिघृक्षतितंप्रत्याहयाज्ञवल्क्यः॥यास्कस्यानीहमानस्यकिंचिद्दत्वाप्रथक्क्रियांकिंचिदस्मैपितस्मेदत्वाविभागःकर्त्तव्यः॥एतच्चतसृणांरायजिघृक्षामाहरिक्थेतरर्थेत्रमुष्यायणस्यविशेषमाहअनुत्रेणपरक्षेत्रनियोगा दितःसुतः॥उभयोरप्यसोरिक्थीपिंडदातानचधर्मतः॥यदाबीजिस्वयमपुत्रोबीजदानसमयेअग्रेसन्नमपसमा वयोरितिप्रतिज्ञांकरोतितदेवोभयोर्बीजिक्षेत्रिणोरिक्थग्राहीसमयाभावेतुक्षेत्रिणएव॥विभागोत्तरकालमुत्पन्नपु त्रंप्रत्याहमनुः॥ऊर्ध्वंविभागाज्जातस्तुपित्र्यमेवहरेद्धनं॥पित्र्यमित्यत्रैकवचनं॥अतएवमातापित्रोर्दत्तंपित्र्यं॥तथा॥ पुत्रैःसहविभक्तेनपित्रायत्स्वयमर्जितं॥विभक्तास्तुतत्सर्वमनीशाःपूर्वजाःस्मृताः॥तथा॥संसृष्टास्तेनवायेस्युर्वि

म० पा० भजेत्तस्तु तैः सह॥ येविभक्ताः संतः पुत्रनप्तृपित्रा सह संसृष्टास्तैः संसृष्टैः सह विभक्तजो विभजेदित्यर्थः॥ पितरि भ्रातरि वा मृते अस्य दुर्गमां यां भ्रातरि भ्रातृपत्न्यां वा सत्यां मन्येषु भ्रातृषु विभक्तेषु सत्सु तस्मादेव गर्भाद्धि भागानंतरमुत्पन्नस्य कथं भागकल्पनेत्याकांक्षायां याज्ञवल्क्यः॥ दृश्याद्धातद्धि भागः स्यादायव्ययविनोधितात्॥ तस्य विभागो तद्धि भागः॥ अत्रतच्छब्दे न पूर्वोक्तरीत्या विभागानंतरमुत्पन्नः परामृश्यते॥ तद्धि भागो दृश्याद्दृश्यादेव॥ वाशब्दोवधारणे॥ कीदृशात्तदृश्यात् आयव्ययविनोधितात्॥ विभागानंतरं प्रतिस्त्रि कांशोः रूप्यादिपुरुक्रियमाणेषु योलाभः सआयः पित्रृतर्णोपाकरणस्वकुटुंबपोषणादिकंयद्व्ययकंक्रियतेसव्ययः॥ आयमंद्रामध्येपरिगण्यव्ययंचोद्धृत्यसर्वेभ्योंशेभ्योयस्मात्तस्माद्यावद्यावदुचितं तावत्तावद्गृहीत्वासमागसमभंद्रांकृत्वा पूर्वोक्तरीत्या विभागानंतरमुत्पन्नपुत्रस्यदद्यादित्यर्थः॥ स्वदुर्गमां यांभ्रातरि भ्रातृपत्न्यांवाप्रसवानंतरं विभागः कर्तव्यः॥ यदाहवसिष्ठः॥ अथभ्रातृणांदायविभागोयाश्चानपत्याः स्त्रियस्तासामापुत्रोत्पत्तेः॥ तासांस्वदुर्गमणांआपुत्रलाभात् आप्रसवात् प्रसवंप्रतीत्स्वदायविभागोभवतीत्यर्थः॥ विभक्तानंतरंमाता पितृव्या वा

विभक्तायपुत्रायांशंकरणादिकेदीयमानेविभागानंतरमुत्पन्नेननिषेधः कार्यः॥ तथाचयो [illegible] पित्रोर्यस्यदुर्गतं तस्यैवधनमवेत्य [illegible] भ्रातृभ्रातृपित्रामातृवायस्यैवदुर्गतंतस्यैवसमानन्यायत्वात्॥ अतएवैकस्मैदीयमानेन्येनाभो न कोपः॥ अथविज्ञातीयपुत्रविभागः॥ तत्रयाज्ञवल्क्यः॥ चतुस्त्रिद्येकभागाः स्युर्वर्णशोब्राह्मणादिजातिषु एकभागविदज्ञास्त्रयेकभागिनः॥ वर्णशोवर्णेवर्णेब्राह्मणक्षत्रियवैश्यशूद्रजातीयास्त्रब्राह्मण [illegible] उक्तब्राह्मणपुत्राः क्रमेणचतुस्त्रिद्येकभाजोभवेयुः॥ शूद्रापुत्रांशापेक्षयाचत्वारोभागाब्राह्मणीपुत्रस्यएतदपेक्षयाचतुर्थोनून त्वात्क्षत्रियापुत्रस्यत्रयोभागाः॥ वैश्यापुत्रस्योर्द्धोनत्वाद्द्वौभागौशूद्रापुत्रस्यैकोभागः॥ सत्रजाःक्षत्रियात्क्षत्रियवैश्यशूद्रजातीयास्वसमायांसत्सन्नास्तेत्रयेकभागभाजः॥ ब्राह्मणस्यब्राह्मण्यां स्वभार्यायामुत्पन्नपुत्रापेक्षयैकस्यांन्यूनत्वात्क्षत्रियात्क्षत्रियायामुत्पन्नस्यत्रयोभागाः वैश्यायामुत्पन्नस्यद्वौशूद्रायामुत्पन्नस्यैकः विद्वान् वैश्यात्वैश्यशूद्रजातीयाभार्यायोरुत्पन्नाः॥ अत्रबहुवचनंबहुपुत्रापेक्षयानतुभार्यागतजातिबहुत्वापेक्षयाब्राह्मणस्यब्राह्मण्यांस्वभार्यायामुत्पन्नपुत्रापेक्षयेयं

140777

शूद्रायस्यसुतास्तादृग्यायासुसन्नस्यहवंशेशूद्रायासुसन्नस्येकोंऽशः॥अनेनैवप्रकारेणपुत्रगतसंख्यासाम्येवैषम्ये
पियोजनीयं॥ब्राह्मणात्क्षत्रियादिजातीयास्वकीयासूसन्नाःपुत्राःप्रतियहप्राप्तांशभागंनलभंतेतथाचनिगमोनप्र
तियहस्तादृग्यास्त्रियादिसकाशाद्वैयद्यप्येषांपितादद्यात्मृतेविप्रासुतोहरेत्॥प्रतियहग्रहणात्क्रियालब्धलभंते॥त
थाशूद्राद्द्विजातिभिर्जातोनभूतेभागमर्हति॥द्विजातिमात्रात्शूद्रायामुसन्नःप्रतियहक्रियादिलब्धायाअपिप्रभवो्भा
गंनलभतइत्यर्थः॥यच्चशूद्रपुत्रस्यांशमात्रनिषेधकंवचनांतरंब्राह्मणक्षत्रियविशांशूद्रापुत्रोनरिक्थभाक्॥यदेवास्यपिता
दद्यात्तदेवास्यधनंभवेदितितदपिजीवतापित्रायदिशूद्रापुत्रायकिंमपियँदिदत्तंतदाविभागकालेभ्रातृभिर्नदातव्योनादत्ते
तसंपित्रानदत्तेत्वंशभाक्त्वमस्यैव॥शूद्राह्यस्यामुसन्नस्यविशेषमाहयाज्ञवल्क्यः॥जातोपिदास्यांशूद्रेणकामतेंशंनाह
रेभवेत्॥मृतेपितरिकुर्युःस्तंभ्रातरस्तद्वभागिकं॥अभ्रातृकोहरेत्सर्वंदुहितॄणांसकातृते॥कामतःपितुरिच्छायांरिक्थभवे
त्॥शेषरिक्थांशदानंतदांशोस्तीत्यर्थः॥अंशभागिकंविवाहिताःपुत्रास्तस्यांशंहरेयुरित्यर्थः॥अभ्रातृकस्य॥अविवाहिता

पुत्ररूपेभ्रातरहितस्यैवंपितृधनंगृह्णीयात्सेयदिपरिणीताऽहितरसुतावानसंतिनस्याद्वातेतदाऽसौशूद्रा
पितामहधनेपौत्रविभागः तत्रयाज्ञवल्क्यः॥अनेकपितृकाणांतुपितृतोभागकल्पना॥अने
अनेकपितृकाःभ्रातरोदृश्यर्थः॥तेषांस्वस्वपितृहारेणपैतामहधनस्यभागकल्पना॥अयमभिप्रायः॥ज्येष्ठभ्रातरस्तेकस्यैकः
पुत्रोवरस्यैवन्यस्यत्रयःपुत्राएवंषट्॥एतेपैतामहधनंषोढाविभज्यनगृह्णीयुः॥अपितुपैतामहधनंभ्रातॄणांत्रेधाविभ
ज्ययस्यैकःपुत्रःसपित्र्यांशंलभते॥यस्यद्वौतावपिस्वपित्र्यांशमेवलभते॥एवमन्यत्रापीति॥पुत्रेस्वसनंतरंकेपुत्रिद्भातरपुत्रेषुके
षुचिद्रियमाणेषुभ्रातॄणांभ्रातृपुत्राणामपिहरौक्थिकेयेवविभागः॥भ्रातरःस्वांशांभ्रातृपुत्राःस्वस्यपुत्रंशंलभंतइत्यर्थः॥पिता
महदत्तेपिपित्रासहविभागेविशेषमाहसएव॥भृत्यापितामहोपात्तानिबंधोदयमेववा॥नत्वस्यांसदृशंस्वाम्यंपितुःपुत्रस्यैव
हि॥भृत्यक्षेत्रादिका॥निबध्यतइतिनिबंधः॥एकस्यांपर्णवाटिकायामिमेपर्णानिपतंतिएकस्यांकस्तूकवाटिकायामिमेपर्ण

ऋणकृतफलानिभवंतीतिनयाप्रारकोविदैः संरभ्यापर्णभरकादिकनिष्पलदृतिनिबंधः॥ इत्यंप्रतिग्रहविजयव्यापार रूप्यादिभिरुपार्जितंरूपवर्णरजतादिएतादृशिसमस्तेपैतामहेधनेपितुःपुत्रस्यस्वाम्यंसममेव॥अतोजीवतिपितरिपितुरिच्छयैवविभागः॥पितुश्चेच्छाबंधोपितृतोभागकल्पनेत्यादिनियमानसंतीत्यर्थः॥मृताद्दास्यामुत्पन्नस्य पौत्रस्याप्येवमेवस्वाम्यंपरंतुविभागोविशेषः॥सविशेषोनंतरविभागप्रकरणोक्तरीत्यावेदितव्यः॥ननुनैकपितृकाणांतुपितृतोभागकल्पनेत्ययुक्तंपैतामहधनस्यपितृद्वाराभागकल्पिर्नस्वरूपतइत्युक्तं॥भूर्यापितामहोपात्तेयत्नेनतुपितापुत्रयोःपैतामहधनेसममेवस्वाम्यमिष्यते॥अतःपूर्वापरविरोधइतिचेत्॥मैवं॥अनेकपितृकाणामियंस्मृतिःपुत्राणांपैतामहधनविभागविषयं॥एतच्चपितृतोभागकल्पनेत्ययुक्तंपरेनद्योतते॥ पितृद्वारापौत्राणांतद्वासंबंधोनगम्यते॥एतत्तुपितरिपितरिविद्यमानेनघटते॥तस्यापिजन्मनेवसंभवात्॥पितरिचमृतेतुमरणादेवतस्यस्वत्वनिवृत्तेः॥पौत्राणामेतद्वासंबंधोघटतइतिपितृमरणानंतरंपौत्रादीनांपैतामहधनविभागकाल

त्वात्॥अनेकपितृकाणामियंस्मृतिर्नघटतेननियम्यते॥भूर्यापितामहोपात्तेयत्तुपितापुत्रयोर्विद्यमानयोस्तुल्यापैतामहधनविषयं॥एतच्चपितुःपुत्रस्यचैवहीत्यनेनांशेनद्योतते॥मृतस्यस्वाम्यंपितुःपुत्रस्यचैवहीत्यनुपपन्नंस्यात्॥यदात्रयोभ्रातरस्तत्रैकस्यैकःपुत्रअथ[illegible]स्तोऽपरस्यत्र यःस्यात्तथाचसर्वेषुपितापुत्रेषुविद्यमानेषुदृष्टोनैवव्यवस्था॥यदातेकपुत्रसंततौपुत्राःपौत्राश्चजीवंति॥पुत्रांतरसंततौतुनपुत्राःकिंतुपौत्राएवतदाजीवंतःपितापुत्राभूर्यापितामहोपात्तेयत्नेनन्यायेनपैतामहधनंलभंते॥यदातुपुत्रासंततयःपौत्राएवतत्तेनतदातेपौत्राएवसाक्षाद्धनंलभंते॥अनेकपितृकाणांतुपितृतोभागकल्पनाइयंनेनन्यायेननूभूर्यापितामहोपात्तेयत्नेनन्यायेनतेषांसमीपितृकत्वात्॥अयंचविभागक्रमःपितामहेमृतएवतस्मिन्विद्यमानेपितरिइच्छयावाविभागोभवतिनपौत्रेच्छयापितरिविद्यमानेपित्रिच्छयाकदाचित्पुत्रेच्छयावाविभागइतिविभागकालकथनमस्तावेहिहेतुत्वात्॥अथमातुरंशाःकृत्स्नतश्चयास्तवस्त्रियः॥यदिकुर्यात्समानंशान्सुतास्त्रियः कार्याःसमांशकाः॥नरनंस्त्रीधनंयासांमृ

र्त्रांवाश्वकरेणवा॥समत्र्यंशोन्यूनाधिकभावरहितांत्र्यंशपरः॥अथवासमत्र्यंशेचत्रुटित्र्यंशैकभागाःस्युरित्रयांत्र्यं
परः॥त्र्यास्त्रोक्तसमत्वात्॥त्र्यास्त्रोक्तसमत्वात्समत्र्यंशपदेत्र्यः॥एवंव्यवस्थितेयदापितास्वेच्छयापुत्रान्समांत्र्यंशभागःकरो
तितदापत्न्योपिसमांत्र्यंशकाःकार्याः॥यदिब्राह्मणाद्यःसन्नपुत्राणांसदृत्र्यंसदृत्र्यंवांत्र्यंस्तदात्मार्हणमपिसदृत्र्यं
एव॥यदामूर्द्धावसिक्तादिपुत्राणांयथाक्रमेणत्रिद्व्येकांत्र्यंस्तदात्मार्हणमपिस्वस्वपुत्रसमांत्र्यः॥एवंप्राजापत्यपर्या
दःत्र्यंत्रमित्यादि॥स्त्रीधनमलंकारादि॥यदिस्त्रीधनंदत्तंतदादत्तेत्यर्थःप्रकीर्त्तितमित्यधिवेदनप्रकरणोक्तप्रकारो
वित्तेयः॥सचेदयंपरइत्यर्द्धंत्र्यंशमात्रपरेनतुसमविभक्तांत्र्यंपरः॥यावताधनेनसपुत्रांत्र्यंशान्त्र्यंशंभवतिस्त्रीधनं
तावदंशंदत्वापत्न्यंशोपिपुत्रांशैस्त्र्यंशसमःकर्त्तव्यइति॥ननेवंसतिप्रकारांतरेणस्त्रीधनमपिविभज्यनामिकृत्स्यान्न
चास्त्रीधनस्यविभज्यत्वप्रतिपादकंवचनंविरोधदर्शनेनेवं॥यत्रापवादकंवचनमस्तितत्रापवादकबलात्सा
मान्येनस्त्रीधनस्यविभज्यत्वंप्रतिपादकवचनानांबाधःयत्रापवादे॥नास्तिनबाधः॥अत्रचनदृश्यंस्त्रीधनंयावतीमिति

दृश्येत्यर्थेप्रतिकल्पनेदृश्यनयोरार्थिकैकवाक्यत्वेनापवादकत्वं॥यदातुपित्राग्रेशभागेनेत्यादिप्रकारेणविभा
गंकरोतितदापत्न्योपिस्वांशादभागानसंतिकिंतुज्येष्ठादिभागोद्धारेणयदवशिष्टंसमुदितं॥तस्मात्समानंत्र्यंशं
त्र्योत्र्यंशमंतेतथास्त्रीयोद्धरंच॥तथाचापस्तंबः॥परिभांडंचगेहालंकारोभार्यायाश्चतिष्ठद्योपकरणंदद्युरुपलभ्युत्रा
श्चर्षादिभांडमिक्ष्यतेधुनारिक्तेसतिपुत्रैःक्रियमाणेविभागेपिमातुःसमांत्र्यएव॥तथाचयोगेश्वरः॥पितुरूर्द्धंवि
भजतांमातापित्र्यांसमंहरेत्॥पितुरूर्ध्वंपितरिमरणानंतरंअत्रापिनदत्तंस्त्रीधनंयासां॥भर्त्रावाश्वकरेणवादत्तंतथा
दत्तेत्यर्द्धंप्रकल्प्ययेत्॥दृश्येतुहार्द्धंयोयोज्यंसमानन्यायत्वात्प्रतिषेधासंभवात्च॥एवमेवविज्ञानेश्वरभारुचिप्रभृती
मपिमतं॥अथवादत्तेत्यर्द्धंप्रकल्प्ययेदित्यत्रार्द्धशब्दःसमविभागपरःअतश्चस्त्रीधनेविद्यमानेपुत्रांशास्यार्द्धोनानि
कृत्वापुत्रांशास्यार्द्धंपंचनिष्कात्मकंदद्यादित्यर्थःभवति॥भ्रातृभार्यायाणांयोलंकारःसोविभज्यएवतथास्त्रीयएवयदा
विभागाधिकारिण्यस्तदपियस्ययद्गृहभूषणंदृश्यंदत्तंनतदप्यविभज्यमेव॥एतच्चाविभज्यप्रकरणेव्यक्तंभविष्यति॥

यदातुपितामहोपार्जितंधनंपितापुत्रौविभज्यगृह्णीतस्तदापितामहपत्नीसपुत्रापूर्वोक्तरीत्यासमांशांलभते॥मातापुत्रांसमंहरेदित्यु क्तत्वात्पितामहोपार्जितस्त्रीधनंचपुत्रैर्विभज्यगृह्यते॥यदिपितामहपत्न्यपुत्रास्तर्हिस्त्रीधनंदुहितृणांलभतेनांशां॥तथापितामहधनविभागेमातांशेनलभतेकिंतुस्त्रीधनादिकमेवयदिकुर्यात्समानंधनात्पत्न्यःकार्याःसमांशकाः॥तथापितुरुद्धृतंमातापुत्रांसमंहरेदित्यनयोरेवपितृधनस्वाम्यापेतधनविषयत्वात्पितृप्रधानकस्वाम्यापेतत्वंचैवं ज्ञेयं यद्धनंपित्रविभागलब्धंप्रतियहादिभिर्वास्वतारुतमितिपितृधनंपुत्रगामीत्युक्तंमातृधनेकोवाधिक्रिय तइत्याकांक्षायामाहायाज्ञवल्क्यः॥मातुर्दुहितरःशेषमृणंस्त्रीधनऋतेव्ययः॥मातरिमृतायांपाकरणानंतरंयदवशिष्टंमा तृधनंतद्दुहितरोविभज्यगृह्णीयुः॥तत्रायंविशेषः॥विवाहितविवाहितदुहितृसद्भावेत्वविवाहिताएवगृह्णीयुः॥अ विवाहितानामभावेविवाहिताविवाहितदुहितृमध्येयादरिद्रादुहितरस्ताएवगृह्णीयुरिति॥तत्रगौतमः॥स्त्रीधनं दुहितृणामप्रमत्तानामप्रतिष्ठितानांचेत्प्रेतवतामविवाहिताःअप्रतिष्ठितादरिद्राःस्युर्जातेदुहितरिविनापुत्रेण

21
1950

भावेदुहितृसंतत्यभावेऽन्वयः॥प्रजादौर्गृह्णीयातदुहित्रभावेतत्संततिरित्ययमर्थः॥उक्तंचबृहस्पतिना॥अप्रजापत्नीधनंगृह्ण णेधिकारः॥तत्रयाज्ञवल्क्यः॥अप्रजास्त्रीधनंभर्तुब्राह्मणादिचतुर्थ्यांदुहितृणां प्रसूतायांचतासूत्तरेषुपितृगामितत्॥ततस्त्रीधनमप्रजस्यपत्यरहितायांदुहितरिदौहित्रपुत्रपौत्ररूपापत्यरहितायांस्त्रियां मृ तायांबांधवाःभर्तृदायआददीरन्॥ब्राह्मदैवार्षप्राजापत्यविवाहसंस्कृतायांभार्यायांमृतायांतद्धनंभर्तृगृह्णातितदभावे यौतर्कुलेप्रधानसन्ततिरास्तेगृह्णीयुः॥तदभावेपितृकुलेयेप्रधानास्तेगृह्णीरन्इतिविवेकः॥शेषेषासुरगांधर्वराक्षसपैशाचे षुविवाहेषुभार्यायांप्राप्तायामृतायांधनंपितरौमातापितरौगृह्णीतः॥प्रथमंमातातदभावेपितातदभावेपितृकुलप्रधा सन्नातदभावेभर्तृकुलेयेप्रधानास्तेगृह्णीयुः॥सर्वेष्वपिविवाहेषुयदिसाप्रसूतातदादुहितृणांदुहितृणांदौहित्रणां ॥अत्रदुहित्रभावेनसाक्षादुहित्रभावेमातुर्दुहितरःशेषमित्यनेनपौनरुक्त्यंस्यात॥दौहित्रश्चपूर्वप्रतिष्ठितःप्रतिष्ठितसम वायेअप्रतिष्ठितश्चेत्सवादोदौहित्रणांचित्रणांचिन्नामत्रकाणांविषमसंख्यकानांसमवायेमात्रंशविभागः॥यदाहगौतमः॥

पित्रमात्रा स्वयमेभावविशेषइति॥ दुहितृणांदौहित्रणांचविद्यमानेदौहित्रणांप्राप्तिरेवनास्तीत्यर्थः॥ नारदोदानं॥ तथा
चमनुः॥ यास्तासांस्युर्दुहितरस्तासामपियथार्हतः॥ मातामह्याधनाद्किंचित्प्रदायेप्रेतिरेवकं॥ तासांदुहितृणांतु
दुहितरः दौहित्रणामभावेदौहित्राः॥ यथाहनारदः॥ मातुर्दुहितरोभावेदुहितृणांतदन्वये॥ मातुर्धनंदुहितरः आप्नु
युः॥ तदभावेतदुहितृणांतदभावेतदन्वयेयेजानादौहित्रास्तेषामित्यर्थः॥ तदन्वयइति॥ प्रथमविभक्तेनोपपादः॥
तथापिदौहित्रा एवगृह्णंते॥ नैनंदौहित्रीसंततिः॥ तस्माद्दौहित्रापेक्षयाविप्रकृष्टत्वात्दौहित्राणांनाप्यृक्थेन्वयः॥
इत्यन्वयस्तावत्पौत्राः पुत्रपौत्रादयः क्रमेणधनभाजः॥ अनेनैवाभिप्रायेणमनुः॥ जनन्यांसंस्थितायांतुसमंसर्वेस
होदराः॥ भजेरन्मातृकंरिक्थंभगिन्यःसाक्षाबत्स्वमातृदुहितरः तदभावेतदौहित्रपर्यंतास्तदभावेसहोदराः॥ मातायाः
साक्षात्सुताः सेनपत्नीपुत्राः तदभावेपौत्राइत्यस्यवचनस्यतात्पर्यार्थः॥ समंसर्वेसहोदराइत्यत्रसहोदरग्रहणंभि
न्नोदरनिरासार्थंस्वसृणामभावेसपत्नीपुत्रादयः॥ यदातुसाँत्यदुहिताउत्तमजातीयासापत्न्यपुत्रस्यहीनजातीयस्तदो

23
1950

त्तमजातीयादुहितैवगृह्णातितदभावेतादृग्विधदौहित्र एव॥ तथाचमनुः॥ स्त्रियश्चयाःकुलेनास्तांपित्राद्यैर्वाप्रकल्पितं
चनरीब्राह्मणीतदुरिक्थस्यैवामभवेत्॥ स्त्रीधनंकन्यकाहरेदित्यत्र॥ सापेक्षयास्त्रीस्त्रीत्वसंबंधेनकन्यकानि
तम्बस्त्रीकन्यकाशब्दयोः॥ प्रतियोगिशब्दत्वाभावात्सापत्नमातासापत्नदुहितेत्यवगम्यते॥ ब्राह्मणीक्षत्तमजा
तिप्रदर्शनार्थं॥ अतःक्षत्रा स्त्रीधंब्राह्मणीक्षत्रियावैश्याकन्यकाचगृह्णाति॥ एवंवैश्यांधंब्राह्मणीक्षत्रियाचक्षत्रिया
स्त्रीधनंब्राह्मणीति अत्रोत्तमजातीयाएवसापत्नकन्यकाधनग्रहणाभिधानात्॥ हीनजातीयसपत्नीदुहितृ
णामुत्तमजातीयसपत्नीपुत्रसद्भावेधनग्रहणंनास्तीतिगम्यते॥ पुत्रपौत्राभावेतत्सुताद्यैर्वंक्रमेणभ्रातरोधन
भाजः॥ एतच्चस्त्रीधनंशुल्कव्यतिरिक्तमेवविभाज्यंशुल्कंतुसोदरा एवगृह्णीयुः॥ तथाचगौतमः॥ भगिनीशुल्कं
दर्योमर्तुंमातुरिति॥ दुहित्रादिषुपौत्रपर्यंतेषुविद्यमानेष्वपिभगिनीशुल्कंसोदराएवहरेयुरित्यर्थः॥ स्त्रीधनप्रसं
गाद्गृह्णतांविषयंकिंचिदुच्यते॥ याज्ञवल्क्यः॥ दत्वाकन्यांहरन्दंड्योन्ययंदद्यात्सोदयं॥ मृतायांदत्तमादद्या

सरिप्रोध्योभयंव्ययं॥ वाचाकन्यांदत्तास्मिन्दोषाभावेपितांहरन्जातिद्रव्यगुणाद्यनुसारेणदंडनीयोराज्ञा॥ वाग्दान
निमित्तंयद्धरेणतत्पित्रादिनाव्ययीकर्तंतत्सकलमपिसद्धिकंवरायदेयं॥ वाग्दत्तविवाहात्सर्वंयदिमृतातस्यास
सूर्वंदत्तमंगुलीयादिस्तुकुंवावहरआददीत॥ किंकृत्वाउभयव्ययंविशोध्यउभयोःआत्मनःकन्यायदातुश्चव्य
यंपरिशोध्यवाग्दानादिनिमित्तंवर्गदूषीकृतंधनंतस्मादंगुलीयकादिरूप्यकन्याधनानिगृहीत्वावरएवा
ददीत॥ यत्तुकन्यायैवाग्दानात्सर्वंस्त्रीयापितामहपित्रादिभिःतस्याःसर्वंकृत्वासमर्पितंशिरोभूषणादित्कृत्व
एविशेषमाहबौधायनः॥ रिक्थंमृतायाःकन्यायाःगृह्णीयुःसोदरास्तदा॥ नरभावेमातुस्तद्भावेपितुरितिप्रास
त्यानुप्रसन्नास्त्रियांजीवत्यामपिकिंचिदुच्यते॥ योगीश्वरः॥ दुर्भिक्षेधर्मकार्येचव्याधौसंप्रतिरोधके॥गृहीतस्त्री
धनंभर्त्रानस्त्रियेदातुमर्हति॥ धर्मकार्यंआवश्यककर्त्तव्ये॥ संप्रतिरोधकेबंदीग्रहणनिग्रहणौरोगेषुद्रव्यांत
रभावेभर्त्रास्त्रीधनंगृहीत्वापुनस्तस्मैवनदातुंनार्हति॥ अवश्यंदातव्यमितिनियमोनास्तीत्यर्थः॥ प्रकारांतरे

25
1980

णाग्रहणेदातव्यमेवभर्तुरेवोक्तस्थलेषुदत्तानाम्येषांजीवंतीनांतुतासांयेतद्धरेयुःस्वबांधवाःतान्स्त्रीध्यानचोर
दंडेनधार्मिकःस्थिरोपतिरितिदंडविधानात्॥ स्त्रीधनस्वरूपमाह याज्ञवल्क्यः॥ पितृमातृपितृभ्रातृदत्तम
ध्यग्न्युपागतं॥ आधिवेदनिकायंचस्त्रीधनंपरिकीर्त्तितं॥ बंधुदत्तंतथाशुल्कमन्वाधेयकमेवच॥ अध्यग्न्युपागत
विवाहकालेअग्निसमीपेमातुलाभिर्दत्तं॥ आधिवेदनिकंअधिविन्नास्त्रियैदत्तादाधिवेदनिकंसमं॥ नरदत्तस्त्रीध
नंयस्यैतावद्द्रव्यंकल्प्यमेरितिउक्तंयस्याउपरिविवाहःक्रियतेसाधिविन्नासाचासौस्त्रीचअधिविन्नस्त्रीतस्यैअ
धिवेदनिमित्तंधनंआधिवेदनिकं॥ तत्समंदत्तात्॥ यावदधिवेदनायालंकरणादिनावस्त्रियैदत्तादित्यर्थः॥अ
त्रविशेषमाहनरदत्तस्त्रीधनमित्यत्तरार्द्धनअस्यचार्थोविवृतोमातुरंशकथनप्रस्तावेअधिवेदनिकायंच॥ आय
व्ययेनकर्त्तनंकेयकर्त्तनंकेयंविसभागपरिग्रहनिध्याधिगमादिप्राप्तमुच्यते॥ कात्यायनः॥ विवाहकालेयत्स्त्रीभ्यो दी
यतेह्यग्निसंनिधौ॥ तदध्यग्निकृतंसद्भिःस्त्रीधनंपरिकीर्त्तितं॥ यत्पुनर्लभतेनारीनीयमानापितुर्गृहात्॥ अध्यावहनि

कार्यं च स्त्रीधनं तदुदाहृतं॥ प्रीत्यादत्तं यत्किंचित्पत्या श्वशुरेण वा॥ पारिबर्हणिकं चैव प्रातिदत्तं तदुच्यते॥ ऊढया कन्यया वापि पत्युः पतिगृहे पितृगृहे वा॥ भ्रातुः सकाशात्सिद्धो वा लब्धं सौदायिकं स्मृतं॥ विवाहासरतो यच्च लब्धं भर्तृकुलस्त्रिया॥ अन्वाधेयं तु तद्द्रव्यं लब्धं पितृकुलात्तथा इति॥ अथ विभक्तस्य स्वर्यातस्य पुत्रपौत्ररहितस्य दायग्रहणाधिकारक्रमः॥ तत्र याज्ञवल्क्यः॥ पत्नी दुहितरश्चैव पितरौ भ्रातरस्तथा॥ तत्सुता गोत्रजा बंधुशिष्यसब्रह्मचारिणः॥ एषामभावे पूर्वस्य धनभाजुत्तरोत्तरः॥ स्वर्यातस्य तु पुत्रस्य सर्वे वर्णेषु नारीसर्वाश्चेत्स्त्रिय एकभागाः स्युरिति ननक्रमेण विभज्य धनं गृह्णंति॥ पत्यभावे दुहितरः॥ तथा च कात्यायनः॥ अपुत्रस्य मृतस्यापि भार्या दायमवाप्नुयात्॥ तदभावे तु दुहितॄणां यत्र दाभवेदिति विशेषो पारानाहृतानांसमवाये अन्वाहार्यं गृह्णंति॥ ऊढासु पितृदभावे तु सपत्नीस्त्रीधनं दुहितॄणां अप्रमत्तानामप्रतिष्ठितानांवेति गौतमवचनान्न्यायस्य पितुर्धनेपि समानत्वात्॥ दुहितृभावे दौहित्रो धनभाक्॥ यदाहिष्णुः॥ अपुत्रपौत्रसंतानेदौहित्रो धनमाप्नुयुः॥ पूर्वेषांतु स्वधाकारे पौत्रादौहित्रकामतः॥ अयमर्थो याज्ञव

न्क्योनापि दुहितरश्चैवेयं च कारणद्योतितः॥ दौहित्रस्याप्यभावे पितरौ धनभाजौ॥ माता च पिता च पितरौ अत्रैकशेषेक्रमात्सतीलावपि विग्रहवाक्यक्रमप्रतीतेर्विग्रहवाक्यक्रमानुसर्तव्यो दायग्रहणेपि॥ तत्र श्वश्रूधूमाता गृह्णाति तदभावे पिता॥ एतच्च यथा पत्नी दुहितरश्चेत्यत्र समस्तेवाक्यसंदर्भे यायं क्रमो धनभाजुत्तरोत्तरइति वाक्यं दोषैरिहितस्तत्सकलमपि तथैवेत्यस्माभिरुपपादितं मिताक्षरायां कात्यायनवचनव्यवहाराध्याये विस्तरेण यान्नेहलिखितं॥ पित्रभावे भ्रातरस्तत्रापि प्रथमं सहोदराः सहोदराणामे कमातृजेनसन्निकर्षात्॥ सहोदराणामभावे भिन्नोदराः॥ सन्निकर्षविशेषादेव धनग्रहणस्मर्यते॥ अनंतरः सपिंडो यस्तस्य तस्य धनंमवेत्॥ इतिसपिंडाद्यानंतरः सन्निहितः प्रयासन्नशरीरबंधेनतस्य प्रयासन्नस्य धनंसपिंडस्य धनंभवेदित्यर्थः॥ उभयविधभ्रात्रभावेतत्सुताः॥ भ्रातृपुत्राः॥ पित्रापि प्रथमं सोदरभ्रातृपुत्राः तदभावेपि भिन्नोदरभ्रातृपुत्राः॥ यदाह वे कस्मिन्भ्रातरिमृतेतद्धनं पत्नीदुहितरइत्यनेन न्यायेनभ्रातृसंबंधित्वेनभ्रातृ॥ प्राप्तेतद्भनविभागासर्वमेवैकोभ्रातास्मृतः तत्सुताः संतितदात्तसुतोणां

पित्रतोभागकल्पनेत्यनेनन्यायेपित्रभागोस्त्येव॥स्वपितुर्द्रव्यग्रहणानंतरंस्वत्वात्॥भ्रात्रपुत्राभावेगोत्रर्क्षोदकधनभाजः
॥गोत्रर्क्षाइत्यनेनपितामहीप्रपितामहपुत्राःतत्पुत्राश्चतदभावेपितामहादयस्तेषामप्यभावेसमानोदकाश्चग्र
ह्यंते॥तत्रायंक्रमः॥भ्रात्रपुत्राभावेपितामहीतस्याभावेपितामहः॥यथामातरंतरमेवपितुरधिकारस्तथापितामह्य
नंतरंपितामहस्याधिकारःपितुरभावेभ्रातृणामिवपितामहस्याभावेपित्र्याःतत्रापिसोदराभिन्नोदरव्यवस्थापूर्ववदेव
सासापितामहीपुत्राःप्रथमंधनंभाजस्तदभावेसापत्न्यपितामहीपुत्रास्तेषामप्यभावेभ्रातृपुत्रन्यायेनपित्र्यपुत्रास्ते
षामभावेतत्पुत्राइत्येवंसप्तमपुरुषपर्यंतंवेदितव्यं॥एवंसप्तमपुरुषाधिकसपिंडाभावेसमानोदकाःतत्रापिपूर्वोक्त
रीत्यासन्निधिर्ग्राह्योऽवश्यः॥गोत्रर्क्षानामभावेबंधवोधनग्रहणाधिकारिणः॥त्रिविधाहिबंधवः॥आत्मबंधकःपि
त्रबंधवश्चेति॥यथोक्तंबृहन्नारदीयेन॥आत्मपितुःस्वसृपुत्राश्चात्ममातुःस्वसुःपुत्राश्चात्ममातुःस्वसुःसुताः॥आत्ममा
तुलपुत्राश्चविज्ञेयाआत्मबांधवाः॥पितुःपितृष्वसृःपुत्राःमातुर्मातृष्वसृःसुताः॥पितुर्मातुलपुत्राश्चविज्ञेयाःपित्रबां

धवाः॥मातुःपितृष्वसृःपुत्राःमातुर्मातृष्वसृःसुताः॥मातुर्मातुलपुत्राश्चविज्ञेयामातृबांधवाइति॥तत्रापिप्रथम
मंतत्रैवोक्तमेणात्मबंधवोधनभाजस्तदभावेतथैवपित्रबंधवः॥तदभावेतथैवमातृबंधवइतिक्रमः॥बृहन्
मप्यभावेआचार्यस्तस्याभावेशिष्यः॥तथाचापस्तंबः॥पुत्राभावेयःप्रत्यासन्नःसपिंडस्तद्भोवे आचार्यः आचार्यभावे
तेवासीति॥शिष्याभावेसब्रह्मचारी एकाचार्योपनीतोयापितोवासब्रह्मचारिणामप्यभावेश्रोत्रियोधनभाजः॥यदा
हापैंग्यः॥श्रोत्रियाब्राह्मणास्तानपत्यस्यरिक्थंभजेरन्निति॥एकग्रहणाद्यावीश्रोत्रियः तस्याप्यभावेब्राह्मणमात्रंसमी
पस्थितंगृह्णाति॥तथाचमनुः॥सर्वेषामप्यभावेतुब्राह्मणारिक्थभाजिनः॥त्रैविद्याश्चुचयोदांतास्तथाधर्मोनहीयत
इति॥ब्राह्मणइत्यंकदा॥त्रिदपिराजानगृह्णीयात्॥यथानारदः॥ब्राह्मणार्थस्यतन्नाशेदायादश्चेन्नकश्चन॥ब्राह्मणा
यैवदातव्यमेनसोस्यान्नरक्षोन्यथा॥मनुः॥आहार्यंब्राह्मणद्रव्यंराज्ञानित्यमितिस्थितिः॥क्षत्रियाद्धनंसब्रह्मचारिप
र्यंतानामभावेपिनब्राह्मणोगृह्णीयादपितुराजैवगृह्णीयात्॥यदाहमनुः॥इतरेषांतुवर्णानांसर्वाभावेहरेन्नृपइतिए

वंपुत्रादिक्रमेणदायग्रहणप्रकारेसर्वत्रयाज्ञवल्क्यःक्वचिदपवादमाहयाज्ञवल्क्यः॥ वानप्रस्थयतिब्रह्मचारिणामन्वयप्राप्तिनः॥ क्रमेणाचार्यशिष्यस्यधर्मभ्रात्रेकतीर्थिनः॥ ब्रह्मचारीनैष्ठिकोनोपकुर्वाणःसच्छिष्यःअध्यात्मशास्त्रश्रवणमननापुपेतः॥ धर्मभ्रातासभ्रात्रेतरेणांगीकृतः॥ एकतीर्थःएकाश्रमीवानप्रस्थएवस्वाश्रमनिकटवासीधर्मभ्राता-वासाधेकतीर्थाचधर्मभ्रात्रेकतीर्थीअत्रक्रमशब्दःप्रतिलोमक्रमाभिप्रायः॥ वानप्रस्थस्यधनंअक्रोमासस्यषण्मासंवत्सरस्यवाअर्थस्यनिचयंकुर्यात्॥ क्रतमाश्चयुञ्जीयज्ञेदित्यनेनप्रकारेणयदुपार्जितंतद्धनादिरूपंवस्तुधर्मभ्रात्रेकतीर्थीगृह्णाति॥ यतेर्धनंवस्त्रपुस्तकादिसच्छिष्योगृह्णीयात्॥ नैष्ठिकब्रह्मचारिणोधनंवस्त्रादिकमाचार्योगृह्णीयात्॥ अथसंसृष्टिविभागःतत्रयाज्ञवल्क्यः॥ संसृष्टिनस्तुसंसृष्टीसोदरस्यतुसोदरः॥ अन्योदर्यस्तुसंसृष्टीनान्योदर्योधनंहरेत्॥ असंसृष्यपिचादद्यात्संसृष्टीनान्यमातृजः॥ इदंविभक्तंधनंमयाभ्रात्रासहसंसृष्टंसंसृष्टमस्यास्तीतिसंसृष्टीतस्यमृतस्यपुत्रपौत्राहरितस्यधनंपत्न्यांदियमानायामपिअपरःसंसृष्टीगृह्णीयात्॥ संसृष्टीत्येकवचनमविवक्षितं॥

अतःसंसृष्टिनोवाविभज्यगृह्णीयुः॥ तत्पत्न्याश्चपोषणंकुर्युः॥ संसृष्टीचपितृभ्रातृपितृव्यैश्चान्यतमेनैकान्येनसंसृष्टाहरेद्धरेत्स्मृतिः॥ विभक्तोयःपुनःपित्राभ्रात्रावैकत्रसंस्थितः॥ पित्र्येणाथवाप्रैषासचसंसृष्टउच्यते॥ यद्यविभक्तानांमध्येकस्यभ्रातुर्भार्यायांमृतपत्न्यांसत्यांसंसृष्टिनस्तद्धनंविभज्यगृह्णंति॥ पश्चात्तस्मादेवगर्भात्पुत्रउत्पद्यतेनदायमनसंसृष्टिधनंतत्पुत्रास्तदद्युः॥ एवमुत्तरत्रापिवेदितव्यं॥ सोदरस्यतुसोदरःसंसृष्टिनोधनंसंसृष्टिमात्रंनगृह्णातिअपितुसोदरस्यैकमातृजन्यस्यधनंसोदरएवगृह्णातिनभिन्नोदरः॥ अन्योदर्यस्तुसंसृष्टीनान्योदर्योधनंहरेत्॥ असंसृष्टीत्यनेनवाक्येनैवदुक्तंभवति॥ सापत्नभ्रातुःसंसृष्टित्वेमृतधनहरणेहेतुरिति॥ असंसृष्यपीयेतत्सदृक्षिवदुःयत्राप्येतिनचचअसंसृष्यपिचादद्यात्॥ संसृष्टस्येतदेकंवाक्यान्तरं॥ असंसृष्यपिविभक्तधनस्यधनंआददीत॥ अनेनचासंसृष्टस्यापिसोदरस्यधनग्रहणंसोदरत्वहेतुरित्युक्तंभवति॥ अत्रसंसंसृष्टपदंपूर्ववदुत्तरेणापिसंबध्यते॥ ततश्चसंसृष्टीनान्यमातृजइत्येतदपरंवाक्यं॥ अस्मिन्वाक्येसंसृष्टशब्देनसंसृष्यभिधीयतेनसोदरःसंसृष्यपिअ

31
1750

स्यमात्रजोभिन्नोदर एवग्रहीयात्॥अत्रैवकुरोमनुवचनानुसारेणाध्याहृतः॥एतदुक्तंभवति॥यत्रासंसृष्टेको
दरःतत्रसोदरेनोर्विद्यमानत्वात्सोदरोप्यंशंलभते॥संसृष्टित्वहेनोर्विद्यमानत्वाद्भिन्नोदरोपिलभतइति॥म
नुरपि॥विभक्ताःसहजीवंतोविभजेरन्पुनर्यदि॥समस्तत्रविभागःस्यादज्येष्ठस्यतथांशविद्यते॥ज्येष्ठएवउद्धारः स
र्वद्रव्याच्चयद्धरमादिनोक्तंविषमविभागात्मकंकर्मनास्तीत्यर्थः॥तथा॥येषांज्येष्ठःकनिष्ठोवाहीयेतांशाःप्रमादतः॥म
तेयान्यतरोवापितस्यभागोनलुप्यते॥येषांसंसृष्टभ्रात्रणामध्येअन्यतरोज्येष्ठःकनिष्ठोमध्यमोवा अंशाप्रदानतोंश
प्रदानेविभागसमयेहीपतेत्कोयांशात्च्युतोभवेत्॥आश्रमांतरस्वीकारेणपतितादिनावाउत्सृज्यतेतस्यभागो
नलुप्यतेअनएवतद्ग्रामंधर्मपथइत्यस्यापवादमविभज्यग्रहीयुरित्यर्थः॥उद्धृतस्यविनियोगप्रकारमाहसोदर्याविभ
जेतांयुसंसृष्टसहिताःसमांभ्रातरोयेचसंसृष्टभगिन्यश्चसनाभयः॥बाह्यद्वयेसोदर्याइतिभ्रातृइतिचपदद्वयोपा
दानात्सोदर्यभ्रातृद्वैनैकोदरभ्रातृद्वैनचभिन्नोदराअभिधीयंते॥अन्यथावैयर्थ्यापत्तेः॥भ्रातरोयेचसंसृष्टाद्वयत्र

संसृष्टपदोपादानात्॥ततःप्रयोगिरत्तसोदर्याभिभजेयुरित्युत्तरंचसंसृष्टपदानुपादानात्सोदर्याअसंसृष्टाइतिगम्य
ते॥ततोस्मृत्योकस्यायमर्थः॥तमुद्धृतमंशंसोदर्याःसहोदराःअसंसृष्टाअपिसमेयदेशांतरंगताअप्यागतासहि
तांशंद्रव्यसमंन्यूनाधिकभागरहितंयथाभवतितथाभजेयुःतथाभ्रातरोभिन्नोदराश्चसमानजातीयाश्चेसंसृष्टासं
सृष्टतथासनाभयःसहोदर्यपभ्रातरोमगिन्यस्ताःसर्वेसमंविभजग्रहीयुरित्यर्थः असमानजातीयानांभिन्नोदरसंसृष्टि
भ्रातृणांतुचतुस्त्रिद्येकभागाःस्युरित्यनेनक्रमेणविभागःसमनुवर्त्यभिन्नजातीयाभ्रातरोतिरिक्तसमानजातीयभि
न्नोदराभ्रातरश्चपतत्वेनापिचरितार्थत्वेचतुस्त्रिद्येकभागाःस्युरित्यस्यबाधकाभावात्॥द्रांक॥भ्रातॄणामप्रजाःश्रेयानक
श्चिच्चश्रयत्रजेतवाविभजेरन्धनंतस्वोपात्तस्त्रीधनंविना॥भरणंचास्यकुर्वीरन्स्त्रीणामाजीवनक्षयात्॥रसंतुवस्त्रं
भक्तंश्वेदृष्टिकरितरासकत्व॥इतरासक्षाण्यामरक्षंतीयु॥इहस्मृतिः॥संसृष्टिनांतुयःकश्चिद्द्रव्यांशोयादिनाधिकः॥पा
प्नोतितस्यदातव्योह्यंशःशेषाःसमांशिनः॥ह्यंशदानंतारतम्याधिक्यकथकप्राप्तौवेदितव्यं॥अत्रचार्थनिरूपणार्थः॥भिन्नोद

रसंसर्गिभ्रात्रभावेसोदराणांमध्येयःसएवतद्धनंगृह्णाति॥अत्रापिसमानजातीयभिन्नोदरभ्रातृषुचतुर्थिये
कभागादयनुसंधेयं॥यदासोदराःअसोदराश्चसंसर्गिनस्तदासर्वेतुगृह्णीयुः॥एवंकरीषायद्यसंसर्गाःसोद
राःतथासोदराश्चगृह्णीयुः॥यद्यसंसर्गभिन्नोदराःसंसर्गाश्चसोदरास्तदासोदराएव॥सोदराणांमध्येकेचनसं
सर्गाःकेचनत्वसंसर्गाःतसोदरत्वरूपहेतुद्वयबलात्संसर्गिनएवगृह्णीयुरिति॥सर्वत्रस्त्रीस्वामरणंचलमते॥
एकमातृजत्वभिन्नमातृजत्वरूपविशेषणभ्रातृषुयेयंव्यवस्थादर्शितासासाक्षात्पितृसापत्नपित्र्येष्वपियोज्यान्या
यस्यसमानत्वादितिकेचन॥तदनुपपन्नंसोदरस्यतुरिक्थविधायकंवाक्यंनत्रैवसोदरस्यापिविशेषकारणंनास्ति॥सो
दरपदस्यपित्र्योपलक्षकत्वाभावात्लोकेसंततिरुद्धत्वाच्चवचनविरोधन्यायस्तत्रनप्रवर्तनइतिसर्वमनवद्यं॥अ
थांत[illegible]:॥तत्रयाज्ञवल्क्यः॥कुष्ठीबोधपतितस्तथैवगुरुतल्पगोजडः॥अंधोबधिरकिलवोगर्भदास्याःसुतोनिरिंद्रियः
॥उन्मत्तःपतितादृक्ततथायश्चित्तादुत्सृजः॥पंगुःपादविकलःउन्मत्तः॥वातपित्तश्लेष्मसन्निपातयश्चावेद्योक्तैरुन्मा

दमतिसमाधेयनयाविदुः॥जडोविकलचित्तःइष्टनिष्टावधारणाक्षमइत्यर्थः॥अत्रविकित्स्यरोगाःअग्नि समाधेयेराज
रोगादियस्तुःआदिग्रहणेनपित्तदुष्टयादयोगृह्यंते॥तथाचनारदः॥पितृद्विड्पतितःषंढोयश्चस्याद्रोपपादिकः॥औरसा
अपिनैवांशंनभेरन्तेनजाःकृतः॥वसिष्ठः॥अनंशास्त्वभ्रातरोजाताः॥आश्रमांतराणि॥नैरुक्तयास्कप्रस्थोत्तमाः॥
मनुः॥अनंशौक्लीबपतितौजात्यंधबधिरौतथा॥उन्मत्तजडमूकाश्चयेचकेचिन्निरिंद्रियाः॥व्याधितानिर्गतेंद्रियं यस्मा
न्निरिंद्रियः॥तेनैवांशभाजोनभवंतिभरणंतुकर्तव्यमेव॥तथाचमनुः॥सर्वेषामपितुर्न्याय्यंदायंपुत्रास्तथामनुरब्रवीत्॥
ग्रासाच्छादनमत्यंतपतितोद्यरदङ्नेत्॥सर्वेषांस्नानदानानांअसंतेयावदुच्यतेमनुनाऽत्र॥विभागःसर्वमप्रत्याख्य
यदोषप्राप्तौसत्यांनतुविभक्तानांयदिविभागकालेदोषदुष्टोविभागोत्तरकालंतोषधादिनादुष्टःप्रायश्चित्तेनवाज्ञ
दाविभक्तेषुसकृत्तोजातःसवर्णायांविभागभागिसूनेनन्यायेनांशप्राप्तिरस्त्येवापतितादिषुपुत्रेगमविवक्षितमुद्दरत
तेठोक्तात्॥अतोमातृपत्नीदुहितृदायोपिदृष्टभर्तृकाएव॥क्लीबादयएवानंशनतत्सुताद्योधरहिताः॥तथाचयाज्ञ

35
1950

वल्क्यः॥ औरसाः क्षेत्रजास्तेषां निर्दोषाभागहारिणः॥ रिक्तांशैषां प्रदातव्या यावद्वै भर्तृसात्कृताः॥ अपुत्रायोषितश्चैषां भर्तव्यासाधुवृत्तयः॥ निर्वास्याव्यभिचारिण्यः प्रतिकूलास्तथैवच॥ क्लीवस्यक्षेत्रजेरेव पुत्रः इतरेषामौरसक्षेत्रजौ॥ केवलौरसक्षेत्रजयोर्ग्रहणादितरपुत्राणामंशोनास्तीतिगम्यते॥ औरससमत्वात्सुविकापिप्राप्नोति॥ साध्वोरसपदेनैवोपात्तादुहितरोभर्तव्याविवाहपर्यंतं॥ यथापिविवाहः कर्तव्यःप्रतिकूलास्तथैवच॥ निर्वास्याःपरंमतिकूलानांपोषणंकर्तव्यं॥ व्यभिचारेदोषाभावात्॥ अथाविभाज्यं॥ तत्रयाज्ञ + ल्क्यः॥ पितृद्रव्याविरोधेनयदन्यत्स्वयमर्जितं॥ मैत्रौद्यूढिकंचैवदायादानांनतद्भवेत्॥ क्रमादायागतंद्रव्यंहृतमाधुद्धरेत्सुयः॥ दायादेभ्योनतद्दद्याद्दि यालब्धमेवच॥ पितृद्रव्याविरोधेनपितृद्रव्यविनाचेन एतत्त्रयंमैत्रादिषुसर्वत्रातुषज्यते॥ मैत्रंमित्रसकाशाल्लब्धं॥ औद्वाहिकंविवाहप्राप्तं॥ पितृक्रमायातंअन्यैरपहृतंपित्रादिनासामर्थ्याभावादनुद्धृतं॥ यत्किंचिद्द्रव्यंपुत्रादीनांदायार्हाणांमध्येयइतरैस्तत्सर्वसाधयेत्यनुज्ञानः॥ सत्वुद्धारापहर्तृभ्यः सदायादेभ्यस्तद्धनंनरद्यात्॥ स्वयमेवोपहर्त्तारंगृह्णी

यात्॥ अन्यापहृतोद्धृतश्चेत्तुविरोधमाहदेवलः॥ सर्वनष्टंतुयोभ्रमिमेकश्चेदुद्धरेत्क्रमात्॥ यथाभागंलभंतेन्येदृष्टांनांतुतुरीयकं॥ चतुर्भागमुद्धर्त्रेदत्वाद्विजांशुवसुपहर्तृसहिताः॥ सर्वेविभज्यगृह्णीयुरित्यथः॥ अध्यापनेवेदा
र्थंयाख्यानचाराध्ययनादिलब्धंविद्यालब्धंपितृद्रव्याविनायेनलब्धमेवादिधनस्याविभाज्यत्वकथनात्पितृद्र
व्यनलब्धमेवादिधनस्याविभज्यत्वमुक्तंभवति॥ अत्रवचनोपात्तमेवादिविद्यालब्धांसद्भिर्नानामेवपितृद्रव्याविरोधे
नतद्विरोधेन॥ अतःपितृद्रव्याविरोधेनाप्रतियहलब्धंविभज्यमेव॥ तथाचविष्णुचारोदृश्यते नारदः॥ कुटुंबंवि
द्यया द्भातुर्वाविद्यामधिगच्छति॥ भागंविद्याधनात्तस्मात्सलभेताश्रुतोपिसन्॥ परमस्योपयोगेनविद्याप्राप्तान्यनस्तु
या॥ तथालब्धंधनंपत्नुविद्याप्राप्तंतदुच्यते॥ मनुः॥ अनुपघ्नंपितृद्रव्यंश्रमेणयदुपार्जितं॥ दायादेभ्योनतद्दद्या
द्विद्ययालब्धमेवच॥ श्रमेणसेवायुद्धादिना॥ तथा॥ वस्त्रपत्रमलंकारंकृतान्नमुदकंस्त्रियः॥ योगक्षेमप्रचारंच
विभज्यंनप्रचक्षते॥ वस्त्राणामविभाज्यत्वंधृतानामेवापात्रंवाद्यनमश्वेद्विविधादि॥ तद्विषयस्यनियमेनाहरण

साधनं तन्न विभाज्यं॥ अथवापत्रमूढ्वा त्रलेख्यनिबद्धधनपरः॥ तथाच बृहस्पतिः॥ ऋणमुद्धाल्लिखितामुक्तिक
मुद्धृत्य अत्रविभाज्यमित्यनुवर्तते॥ कात्यायनः॥ धनंपत्रनिबद्धमिति॥ अत्रायमभिप्रायः॥ यावत्सत्रनिबद्धक
मनोप्रियते॥ तावद्विभाज्यमिति॥ अथवा बृहस्पतिः॥ उक्तप्रकारोविज्ञेयः॥ युक्तंविभजनीयं॥ तद्धनमन्यथान
र्थकंभवेत्॥ विक्रीयवस्त्राभरणमणमुद्धाल्लेखितं॥ कृतान्नंवाकृतान्नेनपरिवर्त्यविभज्यतइति॥ अन्यादृशाद्
त्येतद्विक्रीयतेजीवितंविभाजमेव॥ यद्जाविकादिविषमत्वेनाविभाज्यंतद्ज्ञात्वातथाचमनुः॥ अजाविकंसैक
शफंनजीवतुविषमंभजेत्॥ अजाविकंसैकशफंज्येष्ठस्यैवविधीयते॥ अलंकारोपियोयेनधृतः सोविभाज्यः॥ मनुः
॥ पत्न्योजीवतियःस्त्रीभिरलंकारोधृतोभवेत्॥ नतंभजेरन्दायाभजमानाःपतंतिते॥ अत्रधनेत्व नामग्रीतिदानादिना
मांकितस्वकस्वत्वोपेतत्वं॥ कृतान्नंतंडुलमोदकादि तद्यथासंभवंसर्वैर्मिलितामोक्तव्यं॥ उद्धृतंतद्धनं रूपादिः॥
रूपंरूपविषमंयेनधनंविभाज्यं॥ किंतुपर्यायेणभोक्तव्यं॥ स्त्रियः दास्यः अविरुद्धाश्च॥ तत्रविषमंसरथाकारास्यः पर्या

यणकर्मकारयितव्याः॥ समसंख्याकाविभाज्याः॥ अवरुद्धाःसमाअपिनविभाज्याः॥ यदाहगौत
भागदृतिसंयुक्तासुअवरुद्धासु॥ योगक्षेमंअलब्धस्यलाभोयोगः॥ अलब्धलाभहेतुर्भूतंधनं॥ तस्मात्पुत्राध्यभि
क्षेमं योगशब्देनलक्ष्यते॥ लब्धपरिरक्षणंक्षेमः॥ लब्धलक्षणकारणभूतबहिर्वेदिदानतदाकारामणिमाणिक्यादिसूत्रं क
र्मक्षेमशब्देनलक्ष्यते॥ तदुभयंपैतृकमपिनविभाज्यंपितृव्यादिरोधार्हितमपिनविभाज्यं॥ क्षेमंसूत्रंयोगमित्यमि
युक्तदर्शिनः॥ अविभाज्यमेवंतत्रोक्तेरयनासनमेवचेतिलौगाक्षिस्मरणात्॥ योगक्षेमकारिणंमंत्रिपुरोहितादयो
योगक्षेमशब्देनोच्यंते॥ इत्येके॥ शास्त्रचामरछत्रोपानहश्चभर्तुरयत्परस्यपरे॥ अचारोगृहारामादिःयवेनोनिर्गमभागः॥
अस्मिन्प्रकरणेविषमत्वंनामशब्दानापरपर्यायसंज्ञनवैकशाद्दिसंख्याभिः॥ तद्यथा॥ ज्येष्ठःपुत्रःत्रयोभ्राः॥ तथाचमं
नुष्यापर्यायसंज्ञाद्वैषम्यंयत्रधनांतरं अविभाज्यंसगोत्राणामसहस्त्रकुलादपि॥ याज्ञवल्क्यंत्रयुग्मंचरुनान्नहुरुक्मिणि
यमिति॥ तद्ब्राह्मणजातेःक्षत्रियादिपुत्रविषयं॥ नप्रतिग्रहभूर्दासक्षत्रियायसकायवेरूतिविनोधस्मरणात्॥ याज्ञया

जनलभ्यं॥ नौर्यादिप्राप्तमविभाज्यमिष्यते॥ तत्रापवादमाह व्यासः॥ साधारणंसमाश्रित्य किंचिद्ग्रहणादिकं॥ नौर्यादिना
प्राप्तिधनंभ्रातरस्तत्रभागिनः॥ साधारणंसमुदितंद्रव्यमाश्रित्यया तु वल्क्यः॥ सामान्यार्थसमुत्थानेविभागोपिसमःस्मृतः
॥ समुदितार्थस्यकृषिवाणिज्यादिनासंवर्द्धनेकृतेपिसर्वेषांसमएवविभागः॥ नाजैकस्यहोभागविसूर्यः॥ अथसर्वभाग
विशेषः॥ तत्रयाज्ञवल्क्यः॥ अन्योन्यापहृतंद्रव्यंविभक्तेयदिदृश्यते॥ तत्पुनस्तेसमेरंशैर्विभजेरन्निति स्थितिः॥ विभागानं
तरंअन्योन्यापहृतद्रव्यंतात्कालिकसमेरंशैर्विभजेरन्नेवेत्यविरुद्धंरतिविषयोधारक्रमेणेत्यर्थः॥ तथा॥ विभाग
निह्नवेज्ञातिबंधुसाक्ष्यभिलेखितैः॥ विभागभावनाज्ञेयागृहसेत्रैश्चयौतकैः॥ विभागानंतरंकालांतरेविभागेनज्ञातद्रव्य
प्रकाशेकृतेज्ञातिभिःपितृबंधुभिर्मातुलादिभिःउक्तलक्षणैःसाक्षिभिर्लिखितेनविभागपत्रेणचविभागस्यभावनानिर्णयो
वितेयः॥ तथायौतकैःपृथक्तुगृहसेत्रैश्चवित्तेयः॥ पृथक्कृत्यादिपदेनेनपृथक्पंचमहायज्ञानुष्ठानेनचविज्ञेयइ
त्यर्थः॥ नारदः॥ विभागधर्मसंदेहेदायादानांविनिर्णयः॥ ज्ञातिभिर्भागलेखेनपृथक्कार्यःप्रवर्त्तनात्॥ ब्राह्मणाविभक्ता

नामेकोधर्मःप्रवर्त्तते॥ विभागेसतिधर्मोपिभवेत्तेषांपृथक्पृथक्॥ साक्षित्वंज्ञातिभाव्यंवदानृणमेववा॥ विभक्ताभ्रा
तरःकुर्युर्नाविभक्ताःकथंचन॥ तथा॥ यदेकजातानाबहवःपृथक्धर्माःपृथक्क्रियाःपृथक्कर्मगुणोपेतानचैकार्थपुरुषं
गताः॥ स्वभागानपिदद्युस्तेविक्रीणीयुरथापिवा॥ कुर्युर्यथेष्टंतत्सर्वमीशास्तत्रधनस्यवोद्धृतस्यनिः॥ विभक्तासुविक्ता
वादायादाःस्युरवरेसमाः॥ एकोद्यूनीनाःसर्वत्रदानाधमनविक्रये॥ आधमनमाधीकरणं॥ एतच्चव्यवहारेकर्यापिप्राये
णनतुपृथक्त्वमात्राभिप्रायेणविभागेनैवपृथक्पृथक्॥ ग्रहमदनपारिजातेमदनक्षितिपालदानजलकल्पेस्मृ
तिसारसमुद्धारेपंडितभ्रमरः॥ मतिर्येषांनास्त्रेप्रकृतिरमणीयाव्यवहृतिःपरस्त्रीलंश्लाघ्यंजगति
ऋजवस्तेकतिपयेा॥ विरंचिनेतेषांसुकृतलभ्तेस्थितिमियादियंयासारण्यप्रवरमुनिविष्यस्यभणितिः॥
॥ ॥ इतिपंडितपारिजातकारमल्लयादिविरुदराजीविराजमानस्यश्रीमदनपालविरचितेअष्टम
स्तबकः॥ ८॥ ॥ ॥

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

4,2 ~~40~~
1950